

संक्षित

# वौद्धस्तोत्र संग्रहः

[ प्रथमभाग १ ]

प्रकाशकः-

धर्महर्ष वज्राचार्य्य,

ने. सं. १०६०

# ओंनमः स्वयम्भुवे

आकाशो निर्मलीभूतो निष्प्रपंचःगुणाश्रयः ॥
पंचस्कन्धात्मकःशान्ततस्मै स्तूपात्मने नमः१
वन्देहं तत्वरूपं ततविततभवं भव्यहव्यस्वभावं
बुद्धानामादिबुद्धं कृतविविधहितं तेजसांसन्नि-
धानं संम्यक्सं बोधिमूर्त्तिं त्रिगुणविलासितं पंच
ज्ञानैकहेतुं नैराकारं निरंजं गगनवदनिशंचित्त
चैतन्य चैत्यं इतिशाक्यसिंहबुद्धकृतं स्तोत्रं ॥

# नमःस्वयम्भुवे

श्रीमानादिःस्वयम्भु रमितरुचि रमोघाभिधोऽ
सोम्यबुद्धःश्रीमान्वैरोचनाख्यो मणिभव मुनि
राटवज्रसत्वसुसत्वः॥श्री प्रज्ञा वज्रधात्वीसकल
शुभ करी आर्य्यतारादिकास्ता कल्याणवःक्रि-
यासु क्वचिदपिसरतां निष्ठतां नौम्यऽहंतान्१

# नमोवज्रसत्वाय

नत्वासर्वंतथागतान् गुणगणाधारान् पदार्थ गुरोः श्रीवज्रासननामभूषिततनोःसंसारदोषग्रहैःअस्पृष्टंवरबुद्धता दमशमं तत्साधनंतत्वतां नानावर्ण तथागतादि रचना देहंतथाकथ्यते ॥

# नमोबुद्धाय

तृष्णा जिह्वमसद् विकल्प शिरसं प्रद्वेषचञ्चत्फणं कामक्रोधविषंवितर्कदशनं राग प्रचण्डेक्षणं ॥ मोहास्यं स्वसरीरकोटरशयं चित्तोरगदारुणं प्रज्ञा मन्त्र बलनयःशमितवान्बुद्धाय तस्मैनमः ॥१॥

# नमोधर्म्माय

योज्ञात्यादिक दुःखतप्तमहतांचचुपरं प्राणिणां
यस्मै धातुकपञ्जरा दहःरहसत्वाःसमाकर्षति
अत्राणश्चजगत्समुद्धरतियःसंक्लेश दुःखार्णबात्
सम्बुद्धोष्ट पुटाच्युतायमहते धर्म्मायतस्मैनमः २

# नमः संघाय

चत्वारः प्रतिपन्नगाभवसुखे सत्बाद विद्वेषिण
श्चत्वारश्चफलेस्थिताः समरता शान्तामहायो-
गिनः इत्यष्टौबरपुङ्गलाभगवता यस्मिन्गणे
व्याकृता प्रज्ञा शील समाधि तप्तवपुषे संघाय
तस्मै नमः ॥ ३ ॥

इतित्रिरत्न स्तोत्रम्

# नमो वज्रासनअक्षोभ्याय

आकाश कान्तिकृतमराड़लंयत् तन्नाममुच्चारण यत्र यस्य ॥ क्षणात्क्षयन्तिकलुषंचसर्वंमक्षोभ्यपादाम्बुजभूयबन्दे ॥ १ ॥

# नमः प्रज्ञापारमितायै

प्रज्ञापारमिता नमामि सततं गन्धादिव्यूहंदशभूमीकंच समाधिराज सहितं लंकावतारा भिधं सद्धर्म्म पुराडरीक गुह्यसहितं सौदर्य बिस्तारकं सौवर्ण प्रभाभा भिधंच सहितं धर्म्मार्थ मोक्षप्रदम् १

# नमोऽष्टबैतरागाय

बुद्धंनमामिसततं वरपद्मपाणिं मैत्र्यात्मकंगगनगंजसमन्तभद्रम् यक्षाधिपंपरहितोद्यतमंजुघोषं

विष्कभिनं नमेखगर्भम् १ ७

# नमो विपश्विबुद्धाय

उत्पन्नो वन्धुमत्यां नृपतिवरकुले योविपश्वी
तिनाम्न:यस्याशीतिसहस्राण्यमरनरगुरोरायु-
रासीत्प्रजानाम् ।।येनावाप्तंजिनेन्द्रं दशवलव-
लिनापाटलावृक्षमूले तं वन्दे ज्ञानराशिंप्रश
मित सकलं क्लेशवंन्हि जिनेन्द्रम् ।। १ ।।

# नम: शिखिबुद्धाय

वंशेपृथ्वीश्वराणां महति पुरवरेय:प्रजातोऽरु-
णाख्ये वर्षाणामायुरासीत्सकलगुण निधे र्यस्य
सप्तायुतानां संप्राप्तोयेनबोधि:परहितपटुनापुं-
डरीकस्यमूले तंवन्दे ज्ञानवारिं शिखिनमृषि-
वरं प्राप्तसंसारपारम् २

# नमो बिश्वभूबुद्धाय

योजातो नोपमायां पृथुतरयशसा मन्वयेपा
र्थिवानामायु:षष्टिसहस्राण्यभव दुरुमते र्यस्यसंव
त्सराणाम् ।। जित्वाक्लेशानशेषा नमृत मधिग
तं येनशालस्य मूले तंवन्दे धर्म्मराजं भुवन
हितकरं बिश्वभू नाम धेयम् ३

# नम: ककुच्छन्दबुद्धाय

क्षेमावत्यांप्रजातो मनुजपतिसमंयोऽवसीद वि
प्रवंशे आयु:पंचायुतानां प्रवरगुणनिधेर्यस्यवा
सवलेन।। जैनेन्द्रंयेनलब्धंत्रिभव हितकरंज्ञान
खड्गै:शिरिषे बन्देहं सिद्धकार्यं सुगतमनुपमं
श्रीककुच्छन्दसंज्ञम् ४

# नम: कनकमुनिबुद्धाय

शोभावत्यां द्विजानां नरपतिमहिते योन्वये

संप्रसूतो यस्याव्दानां सहस्राण्यतिशय वपुषे स्त्रिंशदायुर्वभूव वुद्धत्वं येनरत्नाचलबरगुरूना दुम्बरे प्राप्तमानम् तंवन्दे शाशितारं कनक· मुनिमृषिंध्वस्तमोहान्धकारं ५

## नमः काश्यपवुद्धाय

वाराणस्यांमहीयःक्षितिपति महिते विप्रवंशेऽभिजातो यस्मिनायुःसहस्रा ण्यतिशय मभवन् विंशति र्वत्सराणाम् ॥ येनन्यग्रोध मूले त्रिभव जल निधिः शोषितोज्ञान दीप्त्या तंवन्दे वन्दनीयं मुनिवरमृषभं काश्यपं लोकनाथम् ६

## नमः शाक्यसिंहवुद्धाय

योजातः श्रीबिशाले कपिल पुरवरे शाक्यरा· जेन्द्र वंशे यस्या सीदायुरेकं शतमिह शरदां सर्वलोकैकबन्धोः ॥ निर्जित्याश्वत्थमूलेनमु·

चिमभिगतोऽनुत्तरं येन बोधिं तंवन्दे शाक्य-
सिंहं सुरनर नमितं बुद्धमादित्यबन्धुम् ७

# नमो मैत्रिबोधिसत्वाय

जातिं विप्रस्यवंशे नृपवर महिते केतुमत्यांगृ-
हीत्वा बुद्धत्वं यःकरिष्य त्यमित गुणनिःधे
नांगबृक्षस्यमूले ॥ अष्टाव्दायुर्युतं निक्षिपति
भगवतो भावियस्याग्रमायु वंन्दे मैत्रेय नाथं
तुषितपुरवरा वस्थितं तमुनिन्द्रम् स्तुत्वावै
सप्तबुद्धान् सकलमुपगतान् सप्तसप्तार्कभासो
मैत्रेयं चाष्टमन्तं स्तुषितपुरगतं भाषितं लोक-
नाथं ॥ यत्पुण्यं संप्रभूतं शुभ तरफलदं दे-
हिना मेवसर्वं छित्वा संक्लेशपाशं पटुवरमुनयो
निर्वृतिं संप्रयाताः इति सुगतावदाने ८

# मनः शाक्यमुनये

संबुद्धं पुण्डरीकाक्षं सर्वज्ञं गुणसागरं समन्त-भद्रशास्तारं शाक्यसिंहं नमाम्यहं इतिशाक्य सिंहशतनामोद्धृत स्तोत्रं ॥

# नमः शान्तिघटचैत्याय

नमोस्तु चैत्यं सुगतालयंच विशुद्धरूपंच मला पहंतम् ॥ चैत्यस्वरूपं कुलिशोद्भवंच तं स्तूप बिम्बं प्रणमामिभूयः इति पुरातनपुस्तके ॥

# नमो बौद्धनाथाय

प्रनौमिनाथस्ययस्पदारबिन्दं बुद्धं सरण्यं त्रिफलं फलेशम् ॥ असंख्य पुण्यं सततं प्रबुद्धं त्वंधर्म्म स्वामिजिनपादपद्मम् ॥

# नमो स्वयम्भुबुद्धाय

जातिंबोधिप्रबरमतुलं धर्म्मचक्रमरण्यं चैत्याचार्य्यं त्रिभुवननमितं श्रीमतंप्रातिहार्य्यम् ॥ स्थाने चैत्यं गिरिनगरनिभं देवदेबावतारं बन्दे भक्त्या प्रणमितशिरसानिर्वृतायेनबुद्धाः ॥ इति अष्टचैत्यबन्दनायाम् ॥

# नमोबुद्धाय

नमोस्तुबुद्धायसुविशुद्धबोधये बिशुद्ध धर्म्माय प्रणिधानबुद्धये ॥ सद्धर्म्म पुण्योपगतानुबुद्धये भवाग्रशून्यायविशुद्धबुद्धये ॥ इति सुवर्णप्रभायाम् ॥

# नमोऽश्वत्थवृक्षाय

अश्वत्थात्म महावृत्तं धर्म्मधातु स्वरूपकम् ॥

त्रैलोक्य बन्दितंदेवं द्रुमराजं नमाम्यहम् ॥
इति कवितावदाने ॥

# नमःश्रीमदार्यावलोकितेश्वरा॰

लोकेश्वरशिरशान्तममोघगुणशागरम् ॥ अमिताभाकृतिमौलिं नमाम्य मोघपाशकम् ॥ ह्रींकार संभवनाथं करूणा स्निग्ध मानसम् ॥
अमोघपासनामानं लोकनाथनमाम्यहम् ॥

# नमोबुगमल्ललोकेश्वराय

ह्रींकाराक्षरसंभूतं जटामुकुटमण्डितम् ॥ वज्र॰धर्म्मजटान्तस्थं अशेषरोगनाशनम् ॥ १ ॥
रक्तवर्णो महारौद्रो व्याघ्रचर्म्मम्बरप्रियः । एवं॰बिधौसमायुक्तं लोकनाथंनमाम्यहम् इति साधनमालायाम्

# नमःआनन्दादिलोकेश्वराय

पङ्केरूहस्थायपदाम्बुजायबन्धूकपुष्पातिसुन्द
राय सरोजहस्ताय जटाधरायनमोस्तुतस्मै
करूणामयाय

# नमःपद्मपाणिलोकेश्वराय

वरंपद्मविशालाक्षं त्रैलोक्याधिपतिं प्रभुम् रक्त-
वर्णं महाशान्तं लोकनाथं नमाम्यहम्

# नमोलोकनाथकरुणामयाय

जटाधरंसौम्यविशाललोचनम् सदाप्रसन्नं मुख
चन्द्रमण्ड़लम् सुरासुरैर्बन्दितपादपङ्कजंनमामि
नाथं मणिपद्मसम्भवम्

# ओंनमः श्रीनिशाकराय:

कुन्दतुषारशङ्काशं फलशाकादि जीवितम् ।
हंसवाहनसंप्र थं निशाकर न्नमाम्यहम् १

# ओंनमःश्रीदिवाकराय

जपाकुसुमसंकाशंकाश्यप्प्यं महाद्युतिम् ।
ध्वान्तारिं सर्वपापघ्न प्रणतोस्मि दिवाकरम् १

# ओंनमः श्रीउग्रतारायै

ताराभारभयङ्करी सुरवरी सम्पूजितासर्वदा लोकानांहितकारिणी जयतिसा मातेवयारक्षति कारूण्येन समाहिताबहुविधा संसारभीरूजना माता भक्तिमतां विधात्री जगतां नित्यं भयंध्वंसिनी

# ओँनमः श्रीवसुंधरायै

कल्पोदितेनबिधिनापरिपाठ्यमाना याधारया·
विविधरत्नसुवर्ण शय्या पूर्णंकरोतुभवनंसह·
सैवसर्वंतांसर्वलोक जननींप्रणमामिभक्त्या १

वसुंधरांसदानत्वा दारिद्रार्णवतारिणीम् देशयिष्यामिसत्वार्थं सर्वदुःख प्रमोचनीम् १

# नमो मञ्जुघोषाय

मञ्जुश्रियं जगतनाथं खड्गपुस्तकधारणं ॥
सर्वविद्याफलंदाता मञ्जुश्रियं नमाम्यहम्

शशधर मिवशुभ्रं खड्गपुष्टाङ्गपाणि सुरुचिरमतिशांतं पञ्चचीरंकुमारम् पृथुतरवरमोदां पद्मपत्रायताक्षं कुमतिदहनदक्षं मञ्जुघोषं· नमामि १

पुस्तक प्राप्तिस्थान

असनटोल तह्वाहाल नेपाल

"श्री अन्नपुर्णा प्रेस" असन्